# ध्वनिवर्णपदनिरूपणे पाणिनीयव्याकरणप्रक्रियाया वैज्ञानिकत्वनिरीक्षणम्

**प्रकाशतिवारी**

Department of Vyakaran (Sanskrit Grammar)
Balmeeki Vidyapeeth, Kathamandu, Nepal

*Submitted: 24 Nov.2025*
*Reviewed: 17 Dec. 2025*
*Accepted:. 26 Dec.2025*

***DOI:*** *10.3126/kdk.v6i1.90126*

***Corresponding Author:***
*Prakash Tiwari*
***Email:*** *p85tiwari@gmail.com*
**ORCID:***https://orcid.org/0009-0004-8507-7548*

*Copyright 2026 © the Author (s) and the Publisher*

**कौमोदकी**
***Kaumodaki***
**Journal of Multidisciplinary Studies**
A Peer-Reviewed, Open Access Journal
**ISSN :**
2822 - 1567 (Print)
2822 - 1583 (Online)
https://www.nepjol.info/index.php/kdk/about

**Published by :**
Research Management Cell
Shree Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

**सारः** *भाषाया आधारभूतं तत्त्वमस्ति ध्वनिः । ध्वनिश्च भेर्यादिवादनजन्मा पशुपक्ष्यादिभिः कृतोऽव्यक्तो वर्णाक्षरादिरहितः प्रथमकोटिकः परिकल्पितोऽस्ति । द्वितीयकोटौ तु विविधाषु भाषासु मानवानामुच्चारणसम्बद्धैरङ्गैः सरलतयोच्चायर्माणो वर्णादिरूपो ध्वनिः समायाति । भाषायासम्बद्धे वर्णात्मकः अक्षरात्मको ध्वनिरध्ययनस्य विषयोऽस्ति । ध्वनिमाश्रित्यैव भाषाणामक्षराणि निर्धार्यन्ते । तत एव वर्णानां पदानाञ्च निर्माणेन भाषिकव्यवहाराः प्रचलन्ति । ध्वनिश्च वर्णादिद्वारोच्चार्यमाणो मानवीय श्रुतिद्वारा गोचरीक्रियते । अत्र ध्वनिविषये वर्णविषये पदविषये च पाणिनीयव्याकरणेन निरूपणं यद् कृतं वर्तते तत्र आधुनिकभाषावैज्ञानिकदृष्ट्या अवलोकने पाणिनीयप्रक्रियाया अपि विज्ञानसम्मतत्त्वं साधयितुं शक्यते । अत्राध्ययने पाणिनीयव्याकरणामाधृत्य ध्वनिवर्णपदानां यथोत्तरं सूक्ष्मतः स्थूलतामधिरूढानां विवेचनं विधाय तत्र गता भाषावैज्ञानिकता कियत्यां मात्रायां सुसिद्धेति सोदाहरणं प्रदर्शितम् । इयं विश्लेषणप्रक्रिया तत्त्वातन्तराणां विवेचनेऽपि पाणिनिना भाषावैज्ञानिकीपद्धतिरवलम्बितेति प्रकाशयति । प्रस्तुतेऽस्मिनालेखे पाणिनीयव्याकरणप्रक्रियामाश्रित्य ध्वनिवर्णपदानां भाषावैज्ञानिकसरण्या सगभीरमध्ययनक्रमे शिक्षाप्रातिशाख्यतन्त्रनिरुक्तादिग्रन्थानां शब्दोत्पत्तिविषयकमतमनुसृत्य भाषाया तत्त्वानि विवेचितानि सन्ति । भाषोत्पत्तौ सम्प्राप्तपौरस्त्यविदुषां मतानि गोचरीकृत्य च यथावसरं सप्रपञ्चं समीक्षितं वर्तते । संस्कृतवाङ्मये यत्र विकीर्णतया विविधप्रसङ्गानुसारेण च शब्दार्थविचारो दृश्यते । अतः प्राचीनानां प्रातिशाख्य–निरुक्त–व्याकरणादिग्रन्थान्तर्गतानां तत्तद् ग्रन्थकर्तृणां महर्षीणां मतम्, भाषाविज्ञानविदां च सरणिमनुसृत्य पाणिनीयव्याकरणसम्बद्धाया भाषावैज्ञानिकपद्धतेरनुसारेण ध्वनिवर्णपदानां सगभीरमध्ययनं कृतम् । ध्वनिवर्णपदविषयसम्बद्धं पाणिनीयसिद्धान्तमवलम्ब्य यथामत्यभिनवोऽयमालेखः विरचितः ।*

**शब्दकुञ्जी** – ध्वनिविज्ञानम्, पदविज्ञानम्, भाषाविज्ञानम्, वर्णविज्ञानम्, वाक्यविज्ञानम्।

**विषयपरिचयः**

भाषाया विकास एव ध्वनेर्जातः, अतश्च ध्वनिं विना भाषिको मार्गो नाग्रे प्रसरति । ततो भाषिकतत्त्वज्ञानाय तद्गतवैज्ञानिकत्त्वनिरूपणविवेचनादौ च प्रथमं ध्वनिज्ञानस्य तद्गत विज्ञानस्य चावबोधनमत्यावश्यकं भवति। महासागरसदृशाद् ध्वनेः संसाराद् भाषिकदृष्ट्या औच्चरितदिशा च व्यवहारे समुपयोगयोग्यानां ध्वनिनां समुदायं निर्माय ततो वर्णाः निर्धार्यन्ते। तत एव शब्दपदाभिधानां तत्त्वानां निरूपणां क्रियते । एतदर्थं संस्कृतभाषाया संस्कृतव्याकरणस्य चाध्ययने पाणिनिना ध्वनिवर्णादीनां निरूपणं यत् कृतं तत्र भाषावैज्ञानिकदृष्ट्या सैद्धान्तिकरूपेण निरूपितानां नियमस्योपयोगो विहितो वर्तत इति बहूनां संस्कृतवाङ्मयाध्ययनेनल लब्धप्रतिष्ठानां विदुषां पाश्चात्य भाषावैज्ञानिकानाञ्च विचाराः यत्र तत्र प्रकाशिताः श्रुताश्चाधिगताश्च। तत एव प्रेरणां गृहीत्वा सत्यं पाणिनीयप्रक्रियायां ध्वनिवर्णपदानां विवेचनविधौ वैज्ञानिकता विद्यते न वेत्यत्र विचार्यते।

अत्रालेखे ध्वनिवर्णपदसम्बद्धतया ध्वनिविज्ञानम्, ध्वनिविमर्शः, ध्वनिशब्दार्थं, ध्वनिभेदः, वाग्विभागः, परा–पश्यन्ती–मध्यमा–वैखरीणां संक्षिप्तपरिचयः, प्राण–वायु–श्वास–नाद–श्रुति–स्वर–वर्णाः, इत्येते सप्तवाचोगुणाः, वर्णविज्ञानम्, वर्णोत्पत्तिप्रक्रिया, प्रचलितवर्णक्रमः, वर्णसमाम्नायस्थ वर्णक्रमः, अयोगवाहानां परिचयः, पदविज्ञानम्, पदस्वरूपम्, सुप्तिङन्तानां पदत्वम्, नामाख्यातोपसर्गनिपातानां परिचयः, पदविषयकं निरुक्तकारमतम्, पतञ्जलिमतेन पदविभागश्चेति विषया विवेच्यन्ते।

**समस्याकथनम्**

संस्कृतवाङ्मये ध्वनिवर्णपदतत्त्वविवेचनसम्बद्धा नैकविधग्रन्था प्रातिशाख्य–शिक्षा–निरुक्त–व्याकरणादयः प्रभूततरं सम्प्राप्यन्ते। संस्कृतवाङ्मयं प्राचीनानां भाषासम्बद्धचिन्तनानां निधिरस्ति, परन्त्वाधुनिकभाषाविज्ञानानुसारेण संस्कृतग्रन्थस्थ भाषाशास्त्रीयविषयाणां विशेषतो व्याकरणसम्बद्धानामनुसन्धानात्मकरूपेण विवेचनस्य न्यूनता दृश्यते । एतादृशी न्यूनता प्रतिपदं गोचरीभवति। अतश्चैतां वस्तुस्थितिं निभाल्य प्रस्तुतालेखसम्बद्धा समस्यैका प्रस्तूयते –

**पाणिनीयव्याकरणासम्बद्धाया ध्वनिवर्णपदनिरूपणगताया भाषावैज्ञानिकप्रक्रियाया विषये गभीराध्ययनस्याभावः।**

**उद्देश्यकथनम्**

उपरि समस्यात्मकरूपेण यत् प्रस्तुतं तस्य समाधानार्थं निम्नाङ्कितमुद्देश्यमुपस्थाप्यते–

**पाणिनीयव्याकरणनिर्दिष्ट ध्वनिवर्णपदनिरूपणगताया भाषावैज्ञानिकताया निभालनम्।**

**शोधसीमाङ्कनम्**

भाषाविज्ञानस्य क्षेत्रं व्यापकमस्ति। संस्कृतवाङ्मये विविधा विधा प्राप्यन्ते। तत्र तत्र विधासु सूक्ष्मतया निरीक्षणे विहिते तत्र तत्र भाषाविज्ञानसम्बद्धानि तत्त्वानि समुपलभ्येरन् । पाणिनीयव्याकरणपरम्परायामपि संस्कृतव्याकरणसम्बद्धा

अनेके ग्रन्था आरिताः। तेष्वपि यत्र क्वचन संस्कृतव्याकरणसम्बद्धानि भाषावैज्ञानिकतत्त्वानि गोचरी भवन्ति। तस्य सर्वस्य विश्लेषणन्त्वस्मिन् संक्षिप्त आलेखे विधातुं न पार्यते । अतश्च पाणिनीयव्याकरणपरम्परायामपि विशेषतो ध्वनिवर्णपदनिरूपणप्रक्रियां सूक्ष्मतया निरीक्ष्य तत्र गता भाषावैज्ञानिकता अन्विष्यते। एतच्चास्यालेखस्य सीमाध्ययनक्षेत्रञ्च नियोजयति। तत्र ध्वनिनिरूपणक्रमे वर्णनिर्धारणे पदनिर्वचने च पाणिनिना यथा वैज्ञानिकी प्रक्रियानुसृता तदन्विष्यात्र विवेचनं क्रियते।

**शोधविधिः**

शोधसामग्रीसङ्कलनविधौ प्रचलितानां विधीनामत्र समुपयोगः कृतो वर्तते । तेषु निगमनागमनव्याख्यानात्मकविधयः प्रयुक्ताः सन्ति । प्रधानतयाऽत्र भाषाविज्ञानसम्बद्धविषयाणां विवेचनक्रमे भाषाया स्वरूपविषये तथा भाषाविज्ञानक्षेत्रे प्रतिपादितविषयाणां विवेचनक्रमे निगमनविधिः प्रयुक्तोऽस्ति । संस्कृतव्याकरणस्य विविधग्रन्थानामवलोकनेन तत्र तत्र समधिगतानां भाषातत्त्वसम्बद्धानां ध्वनिवर्णपदगतशास्त्रीयसन्दर्भानामन्वेषणेन ततः सिद्धान्तनिर्माणाय यत्नो विधीयते। अतश्च समग्रतायां विचारणे गुणात्मकोविधिरत्र प्रयुक्तोऽस्ति।

**विश्लेषणस्य सैद्धान्तिकाधारः**

संस्कृतवाङ्मयस्य विविधशाखासु प्रणीतास्तत्तद् विषयकग्रन्थाः प्रधानरूपेण सैद्धान्तिकाधारभूताः सन्ति। तेषु यत्र यत्र भाषातत्त्वसिद्धान्तसम्बद्धाः पक्षा उपनिबद्धाः प्राप्यन्ते तेषां ग्रहणेन सैद्धान्तिकाधारो निर्मीयते । व्याकरणविषये मूलग्रन्थकथनेन सूत्र–वार्तिक–भाष्य–टीका–प्रक्रियादिसम्बद्धाः ग्रन्थाः गृह्यन्ते । स्थापितसिद्धान्तानां सम्बद्धविषयक्षेत्रादुदाहरणानि गृहीत्वा पारस्परिकसमन्वयसम्पादनं प्रकाशनं वा यत्र विधीयते तत्र प्रयुज्यमानो विधिर्निगमनात्मक इति विदुषां समयः । अत्राऽपि संस्कृतवैयाकरण–परम्परायां प्रसिद्धानि वैयाकरणमतान्याधृत्य भाषाविज्ञानस्य महत्त्वप्रदर्शनपूर्वकं तत्र भाषाविज्ञानस्य क्षेत्रे प्रतिपादितविषयाणां मध्येऽत्र ध्वनिवर्णपदानामध्ययने पौरस्त्यविदुषां मतमवलम्ब्य सङ्क्षिप्तरूपेण विवेचनं विधीयते। एष एवास्यालेखस्य सैद्धान्तिकाधारः।

**ध्वनिवर्णपदानां यथा क्रमं विवेचनम्**

भाषाविज्ञानदिशा पाणिनीयव्याकरणनिरूपितानां ध्वनिवर्णपदानां सगभीरमध्ययने प्रथमतः विषयस्य परिचयोपस्थापने निर्धारितानां ध्वनिसम्बद्धशीर्षकेषु ध्वनिविज्ञान–ध्वनिविमर्श–ध्वनिशब्दार्थ–ध्वनिभेदाख्या विषयाः विवेच्यन्ते । वर्णान्तर्गततया च वाग्विभाग–वाचोगुण–वर्णविज्ञान–वर्णोत्पत्तिप्रक्रिया–वर्णक्रम–अयोगवाहानामधेया विषयाः समीक्ष्यन्ते । पदमध्यगतत्वेन पदविज्ञान–पदस्वरूप–पदत्व–पदविषयकमतानि–पदविभागश्चेति विषयाश्चात्र समावेश्यन्ते । क्रममिममनुसृत्य सम्प्रति प्रतिशीर्षकं विश्लेषणं प्रारभ्यते।

***ध्वनिविज्ञानम्***

ध्वनिविज्ञानमिति शीर्षकेऽत्र ध्वनिविमर्शः, ध्वनिशब्दार्थं, ध्वनिभेदः, वाग्विभागः, परा–पश्यन्ती–मध्यमा–वैखरीणां परिचयः, प्राण–वायु–श्वास–नाद–श्रुति–स्वर–वर्णाः, इत्येते सप्तवाचोगुणाः, इत्यादयो विषयाः सन्ति निर्दिष्टाः । अस्या लेखस्योद्देश्यानुसारेण यथाक्रममेतेषां सङ्क्षेपेण स्वरूपनिरूपणं क्रियते।

*ध्वनिविमर्श:*

**ध्वनिर्वर्णाः पदं वाक्यमित्येतद् वाङ्मयं मतम्** (अग्निपुराणम्, ३३७।१॥) इत्यग्निपुराण–वचनानुसारं ध्वनि–वर्ण–पद–वाक्यानि मिलित्वा वाङ्मयं सम्पद्यते। सम्पूर्णस्य वर्णशब्दपदादेराधारभूतो ध्वनिः समस्तस्याऽपि भाषिकजगतो मूलम्, तत एवाक्षरपदादिनामुत्पत्तेः। अतश्च ध्वनिविज्ञानसन्दर्भे प्रथमं ध्वनिर्विमृश्यते।

*ध्वनिशब्दार्थ:*

ध्वनतीति, ध्वननमिति, ध्वन्यतेऽसाविति वा विग्रहे ध्वन्–शब्दे (भ्वादि, धा.पा. ९२८) इत्यस्माद्धातोरधिकरणे **खनिकष्यञ्ज्यसीति** (४।१३९॥) इत्युणादिसूत्रेण इ–प्रत्यये कृते सति ध्वनिः शब्दः निष्पद्यते। शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः। कण्ठसंयोगजन्मानो वर्णाद्याः कादयो मताः। इति कोशेषूपलभ्यते। संयोगविभागाभ्यामुत्पन्नो ध्वनिर्ह्यनित्यः, शब्दस्तु नित्य इति सिद्धान्तः। तथा चोक्तं भगवता पतञ्जलिना— **एवं तर्हि स्फोटः शब्दः। ध्वनिः शब्दगुणः। कथम्? भेर्याघातवत्।** (व्याकरणमहाभाष्यम्, पृ. ७०८।) तद्यथा भेर्याघातो भेरीमाहत्य कश्चिद् विंशतिपदानि गच्छति, कश्चित् त्रिंशत्, कश्चिच्चत्वारिंशत् स्फोटश्च तावानेव भवति ध्वनिकृता वृद्धिः। उक्तञ्च –

**ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।**

**अल्पो महाँश्च केषाञ्चिदुभयं तत्स्वभावतः॥** (व्याकरणमहाभाष्यम्, पृ. ७०८)

ध्वनिः स्फोटश्च शब्दानां सम्बन्धिनौ स्तः। तत्र ध्वनिर्व्यञ्जकः, स्फोटस्तु व्यङ्ग्यः। तत्र प्राकृतो ध्वनिः स्फोटव्यञ्जको वैकृतस्तु ध्वनिरुपलब्धौ पौनःपुन्येन कारणम्। अत एव तस्यापि तेन रूपेण व्यञ्जकत्वम्, तदुपक्रमेणैव भाष्यप्रवृत्तेः। तत्र भाष्ये ध्वनिशब्देन वैकृतध्वनेरेव ग्रहणम्। अत एव हरिणा प्रोक्तम् –

**वर्णस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।**

**वृत्तिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते॥** (वाक्यपदीयम्, १।७६। टीकायाम्, पृ. १३०)

स च वैकृतो ध्वनिः शब्दस्याभिव्यक्तेरूर्ध्वं भवति। तथा चोक्तं हरिणा –

**शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदं तु वैकृताः॥**

**ध्वनयः समुपोह्यन्ते स्फोटात्मा तैर्न भिद्यते॥** (वाक्यपदीयम्, श्लो. ७७, पृ. १३२)

तत्र–**व्यक्तानां ध्वनिः स्फोटश्चेत्युभयं गृह्यते। अव्यक्तानां तु केवलं ध्वनिरेव गृह्यते।** (कैयटः, भाष्यप्रदीपः, पृ. १७ तथा पृ. ५१८।) रामाज्ञापाण्डेयः व्याकरणदर्शनपीठिकायां ह्रस्वदीर्घप्लुतोच्चारणेषु क्रमशः त्रीणि पानीय पलानि, षट् पानीय पलानि, नव पानीय पलानि भवन्तीति कथयति– ह्रस्वाकारोच्चारणे सुषुम्णायास्त्रीणि पानीय–पलानि स्रवन्ति, षट् पलानि दीर्घे, नव पलानि प्लुते (रामाज्ञापाण्डेयः, व्याकरणदर्शनपीठिका, पृ. ११।)।

***ध्वनिभेदः***

ध्वनिश्च द्विविधः– प्राकृतो वैकृतश्च । प्राकृतो ध्वनिरकारादिवर्णरूपः । वैकृतश्च ध्वनिः शङ्खभेर्यादिध्वनिवत् । न वर्णानां ध्वनिर्व्यपदेशो विरुद्धः, शङ्खभेरीमृदङ्गादिशब्दानामेव ध्वनित्वेन व्यवहारादिति वक्तुं शक्यम् । उक्तञ्च– **लोके प्रतीतपदार्थको ध्वनिश्शब्दः ।** (पतञ्जलिः, व्याकरणमहाभाष्यम्, पृ. ४ ।) । अनया महाभाष्यकारोक्त्या वर्णेष्वपि ध्वनेर्विद्यमानता व्यवहारतः सिद्धयति । न केवलं शाब्दिका एव तथा तत्र तत्र व्यवहरन्ति; साहित्यकारा अपि स्फोटमाध्यमेन व्यङ्ग्यार्थे ध्वनिरिति निगदन्ति । यथा काव्यप्रकाशकारेण मम्मटेन शब्दस्य ध्वनित्वं सम्यगनूदितम्– **तथा हि बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः,** इति । (मम्मटः, काव्यप्रकाशः, प्रथम उल्लासः सूत्र २ वृत्तौ ।) एतेन च व्यङ्ग्यप्रधानस्य काव्यस्य ध्वनित्वमिति प्रकाशितं भवति । एवं सामान्यस्य ध्वनेः प्राकृतवैकृतत्वेन द्वैविध्यं पुनश्च काव्यगतस्य ध्वनेरपि साहित्यिकैः प्रतिपादितसरण्यनुसारेण नानाविधत्वं प्रकाशितं दृश्यते ।

***वाक्परिचयः***

उच्यतेऽसौ अनया वेति विग्रहे **वच्**–धातोः **वचिप्रच्छीति (**२।५७।।) इत्युणादिसूत्रेण क्विप्–प्रत्यये दीर्घोऽसम्प्रसारणञ्च कृते सति वाक्यम् इति रूपं सिद्धयति । वाक्शब्दस्य प्रयोगसन्दर्भे मनुना स्मृत्यामुक्तम्– **अहिंसयैव भूतानां कार्य्यं श्रेयोऽनुशासनम् । वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्ममिच्छता ।** (मनु. २।१५९।।) इति । कोशेषु वाक्शब्दस्य पर्यायरूपेण सरस्वती इति शब्दस्य प्रयोगो दृश्यते । अमरकोशः । तथैव कथासरित्सागरे– **प्रणम्य वाचं निःशेषपदार्थोद्दयोतदीपिकाम् । बृहत्कथायाः सारस्य संग्रहं रचयाम्यहम् ।** इति समुल्लिखितं वर्तते । पौरत्यवाङ्मयेषु यत्र तत्र वाक्शब्दस्य प्रयोगं दृश्यते । वाक्परिचयोपस्थापनक्रमेऽत्रालेखे प्रथमं तावद् वाग्विभागः क्रियते, ततः तस्य परा–पश्यन्ती–मध्यमा–वैखरीणां संक्षिप्तपरिचयश्च प्रस्तूयते । तदनन्तरं सप्तानां वाचोगुणानां प्राण–वायु–श्वास–नाद–श्रुति–स्वर–वर्णानां सङ्क्षिप्तरूपेणैव परिचयः प्रदीयते ।

***वाग्विभागः***

परा पश्यन्ती मध्यमा वैखरीभेदात् चतुर्विधा वागस्ति । परमलघुमञ्जूषाकृता नागेशभट्टाचार्येण वाण्याश्चत्वारो भेदाः कथिताः । उक्तञ्च—

**परा वाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।।** (नागेशभट्टः, परमलघुमञ्जूषा पृ. ९४) इति ।

**(क) परावाक्**

परावाङ् नराणां मूलचक्रे स्थिता भवतीति भर्तृहरिणोक्तम् । मूलचक्रं तु मूलाधारे स्थितमिति विज्ञेयम् । तत्र मूलाधारस्थपवनसंस्कृता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परा वागुच्यते । मूलप्रकृत्यात्मिका

कुण्डलिनी नाम षण्णवत्यङ्गुलो देहायाम् । तत्र अङ्गुलार्धसहितं सप्तचत्वारिंशदङ्लिपरिमितेन मध्ये मूलाधार उच्यते । तदेव मूलाधारे कुण्डलिन्यां स्थितो यः पवनः तत्संस्कारीभूता तेन पवनेन मूलाधारस्था गुदलिङ्गान्तर्गतचतुर्दलचक्रगता, अनादिनिधनाख्या शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परा वागभिधीयते । परा हि अत्यन्तसूक्ष्मत्वेन अग्राह्यत्वात् सूक्ष्मा इत्यपि कथ्यते । तदुक्तम्–**स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी** इति । तथैव सङ्गीतरत्नाकरे–

**गुदलिङ्गान्तरे चक्रमाधाराख्यं चतुर्दलम् । अस्ति कुण्डलिनी ब्रह्मशक्तिराधारपङ्कजे ।।**
**आ ब्रह्मरन्ध्रमृजुतां गतेयमृतप्रदा । स्वाधिष्ठानं लिङ्गमध्ये षट्दलं चक्रमस्य च ।।**
**नाभौ दशदलं चक्रं मणिपुरकसंज्ञकम् । हृदयेऽनाहतं चक्रं शिवस्य प्रणवाकृतेः ।।**
**पूजास्थानं तदिच्छन्ति दलैर्द्वादशभिर्युतम् । कण्ठेऽस्ति भारतीस्थानं विशुद्धिः षोडशच्छदम् ।।**
(सङ्गीतदर्पणम् पृ. ७ । शारीरविवेकः श्लो. १७–२०) इति च ।

**(ख) पश्यन्तीवाक्**

दृश्धातोः प्रयोगात् कथञ्चन इन्द्रियविषयीभूता सूक्ष्मरूपेण विद्यमाना वाक् पश्यन्तीत्युच्यते । तस्यां च वायोर्गतिर्नाभिपर्यन्तमूर्ध्वगामिनी भवतीति निगद्यते । नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते । मूलाधारस्थ वायुः यदा नाभिपर्यन्तमागत्य अभिहन्ति तदा वायुनाभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते ।

**(ग) मध्यमावाक्**

वायोरूर्ध्वगमनक्रमे हृदयमधिरूढेन तेन प्रकाशिता वाक् मध्यमेति कथ्यते । अतश्च हृदिस्था वाङ् मध्यमेति वदन्ति वैयाकरणाः । एषा च वाग् हृदयपर्यन्तमागच्छता वायुनाऽभिव्यक्ता भवति । इयं वाक् तत्तदर्थवाचकस्फोटशब्दरूपा श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा जपादौ बुद्धिनिर्ग्राह्या भवतीत्युच्यते । एवञ्च मध्यमा वाक् सा भवति यत्र शब्दो विशिष्टक्रममाश्रित्य बुद्धौ प्रत्यावभासते । एषैव स्फोटात्मिका स्फोटव्यञ्जिका च । एषापि परश्रोत्रग्रहणयोग्यत्वेन सूक्ष्मा । अत्रैव बुद्धिरर्थस्य कृते शब्दनिश्चयं करोति ।

**(घ) वैखरीवाक्**

ध्वनेरुच्चारणाय यथा क्रममूर्ध्वं गच्छता वायुना मुखमारूह्य या वाक् वर्णरूपेण प्रकाश्यते सा वैखरीति निगदितम् । तस्मिन् क्रमे वायुरास्यपर्यन्तं गच्छति । ततश्चोर्ध्वमाक्रामता तेन मूर्धा आहन्यते तदनु पुनः परावृत्य च तत्तत्स्थानेषु या वागभिव्यज्यते सा वैखरी भवति । एवञ्च कण्ठदेशगा वैखरी इति । एषा वाक् परेषां श्रोत्रेन्द्रियेणापि ग्रहीतुं शक्यते । अतः एषा परश्रोत्रग्राह्या वाग्व्यवहारसाधनभूता व्यक्तवर्णसमुच्चारणरूपा प्रसिद्धाश्चास्ति । परा पश्यन्ती चेति वाक् सूक्ष्मा भवति । अतश्च साधारणा लौकिकजना न जानन्ति । एतद्वाग्द्वयं ब्रह्मयोगिनां समाधौ निर्विकल्पकसविकल्पकज्ञानविषयिणी भवतीत्युच्यते । पुनश्च मध्यमारूपां वाचमपि साधारणानां

लौकिकजनानाङ्कृते न गोचरामिति साक्षात्कृतवाग्धर्माणो मनीषिणो विदन्ति । ज्ञानबलाच्च पराख्यां वाचं साक्षात्कुर्वन्ति ।

वैयाकरणाः युगपदेव मध्यमावैखरीभ्यां नाद उत्पद्यते इति कथयन्ति । तत्र मध्यमानादोऽर्थवाचकः स्फोटात्मकः शब्दः कस्यचन विशिष्टस्यार्थस्य व्यञ्जकः । वैखरीनादो ध्वनिः सकलजनश्रोत्रमात्रग्राह्यो भेर्यादिनादवन्निरर्थकः । मध्यमानादश्च सूक्ष्मतरः कर्णपिधाने जपादौ च सूक्ष्मतरवायुव्यङ्ग्यः शब्दब्रह्मरूपस्फोटव्यञ्जकः । तादृशमध्यमानादव्यङ्ग्यः शब्दः स्फोटात्मको ब्रह्मरूपो नित्यश्च ।

| **नादभेदाः** | **अभिव्यक्तिस्थानम्** | **देवता** | **अवस्था** |
|---|---|---|---|
| परा | मूलाधारः | तूरीयः | सूक्ष्मतमा |
| पश्यन्ती | नाभिस्थानम् | ईश्वरः | सूक्ष्मतरा |
| मध्यमा | हृदयदेशः | हिरण्यगर्भः | सूक्ष्मा |
| वैखरी | आस्यप्रदेशः | विराट् | स्थूला |

(सुवेदी, २०८१, पृ. ९०)

मूलचक्रस्था परा, नाभिप्रदेशमागता पश्यन्ती, हृत्प्रदेशं प्राप्ता मध्यमा, कण्ठप्रदेशमभिहत्य परश्रवणगोचरा वाग्व्यवहाररूपा वैखरी भवति । मूलाधारस्थपवनः तत्तत्स्थानमभिहन्ति तदा तत्तत्स्थानेऽभिव्यक्तः पवनः तत्तन्नाम्ना व्यवह्रियते । अनया रीत्या चतसृणामपि वाचां स्वरूपं संक्षेपेणात्र विवेचितम् ।

***वाचोगुणाः***

प्राणाख्यवायु ऊर्ध्वं गच्छन् तत्कण्ठादिस्थानमाहत्य शब्दात्मना विवर्तते । वागुपादानं प्राणः शरीरे ब्रह्मग्रन्थिस्थाने स्थितो वर्तते । स यदा जठराग्निना संयुज्योर्ध्वं वाति तदा वायुर्भवति । तदनु श्वासः, नादः, एवं नादादिस्थानं प्राप्य श्रुतित्वं स्वरत्वं च भजते । अपि च स क्रमशः मूर्धानं सङ्गत्य परावृत्य च मुखं प्रविशन् ताल्वादिव्यापारेण वर्णत्वमुपैति । इत्थं प्राणोऽयमुक्तगुणैरेव वर्णरूपभाषापदभाग् भवतीति बोध्यते ।

| | | |
|---|---|---|
| १. | प्राणः | वागुपादानं प्राणः, शरीरस्थो ब्रह्मग्रन्थिस्थाने स्थितः ।<br>जठराग्निना संयुक्तः प्राण उच्चैर्गत्वा वायुस्वरूपेण प्रवर्तते । |
| २. | वायुः | जठराग्निसंयोगत्वे सति ऊर्ध्वगमनत्वं वायुत्वम् । अयञ्च वायुर्ध्वनेरुत्पत्तेराधारः । |
| ३. | श्वासः | वायुः श्वसनक्रियायां रूपान्तरं प्राप्य श्वासत्वं भजते । |
| ४. | नादः | श्वासजन्यो नादः । श्वासो नादं उत्पादयति । नादो वाग्विकासे प्रमुखः । |

| | | |
|---|---|---|
| ५. | श्रुतिः | नादः श्रोत्रस्थानं गत्वा श्रुतिस्वरूपत्वेन श्रव्यो भवति । |
| ६. | स्वरः | श्रुतिः स्वरत्वं प्राप्नोति । स्वर उच्चारणे विशेषं द्योतयति । |
| ७. | वर्णः | स्वरस्ताल्वादिस्थानं गत्वा वर्णत्वं प्राप्नोति । |

प्राणः वायुः श्वासः नादः श्रुतिः स्वरः वर्णः, इत्थं सप्तवाचो गुणाः संलग्नं कार्यं कृत्वा भाषायाः पदरूपं निर्माति । विद्यावाचस्पतिमहाभागैः प्राणः, वायुः, श्वासः, नादः, श्रुतिः, स्वरः, वर्णः एते सप्तगुणाः विस्तृततया व्याख्याताः, यत्र प्रत्येकस्य क्रियावली एवं भाषा-विकासे तेषां महत्त्वञ्च निरूपितम् ।

***वर्णविज्ञानम्***

वर्ण्यन्ते वर्णनीयविषया एभिरिति व्युत्पत्त्या वर्ण धातोः, अच्–प्रत्यये कृते वर्णः शब्दो निष्पद्यते । वर्णा खलु शब्दानां शब्दानां सूक्ष्मतया अवयवाः । शब्दानामुच्चारणे तेषामभिव्यक्तिर्भवति । सामान्यतया वर्णाक्षरयोः समपर्यायत्वं दृश्यते । अमरकोशे **वर्णं तु चाऽक्षरे** (अमरकोशः ३।३।४८।।) इति कथनेन वर्णाक्षरयोरभेदः प्रतिपादितः । तथैव महाभाष्येऽपि– **अक्षरं न क्षरं विद्यादश्नोतेर्वा सरोऽक्षरम् । वर्णं वाऽऽहुः पूर्वसूत्रे .....** । (व्याकरणमहाभाष्यम् १।१ आ. २।) इति । तैत्तरीयप्रातिशाख्ये– स्वरोऽक्षरम् । सहाऽद्यैर्व्यञ्जनैः । उत्तरैश्चाऽवसितैः । एतदनुसारेण आ, स्था, अर्च इत्यादीनि प्रत्येकमक्षराणि । तत्र आ इत्येकमक्षरम्, एको वर्णश्च । स्था, अर्च इत्यनयोस्तु प्रत्येकं वर्णत्रयविशिष्टत्वेऽप्येकैकाक्षरत्वमेव (वैयाकरणप्रबन्धमुक्तावली, पृ. ३१) इति । प्राणिनां ध्वनौ सर्वत्र संस्काररूपा प्रतिभैव भवति कारणमित्युक्तं वाक्यपदीये –

**अभ्यासात् प्रतिभाहेतुः सर्वः शब्दोऽपरैः स्मृतः ।**
**बालानां च तिरश्चां च यथार्थप्रतिपादने ।।** (वाक्यपदीयम्, ११८)

अर्थात् येऽप्यविदितसङ्केता अमी बालाः जडप्राया वा तिर्यञ्चस्तेषामप्यनादिवासनावशात्तदर्थः प्रतीयमानो दृश्यते शब्दः । तथा च जडानामपि प्राणिनां नियतपदः शब्दः सम्बोधनायोदीर्यते । तेन प्रतिनियतजात्यनुसारेणैव नियतैव काचित् प्रतिभा बोध्यत इति तन्मूल एव सर्वः कश्चित् तेषां व्यवहारः इति । **वाचं देवा उपजीवन्ति विश्वे, वाचं गन्धर्वा पशवो मनुष्याः**, (तैत्तरीयब्राह्मणः, २।८।८।।) इत्यादिकथनेन तत्र प्रतिभारूपः संस्कारः स्वीकार्यः । तेन च— **स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलस्य कः । जन्त्वादयः कुलायादिकरणे केन शिक्षिताः ।।** (वाक्यपदीयम् २।१५०) इत्यादीनामप्युक्तं समाधानं साधु । नहि संस्कारमन्तरेण तथा भवितुमर्हतीति निश्चितम् । तदित्थं व्यक्ताव्यक्तध्वनिरूपः शब्दः प्राणिमात्रव्यवहारोपयोगी सिद्धः ।

***वर्णोत्पत्तिप्रक्रिया***:

अन्तःकरणं स्ववृत्या विवक्षितानर्थान् बुद्धिविषयीकृत्य तद्बोधेनेच्छया मनः प्रेरयति । तच्च मनः कायाग्निमाहन्ति । ततः कायाग्निं मूलाधारं पवनं प्रेरयति । स प्रेरितो वायसः उरसि चरन् प्रातस्सवनभक्तं गायत्र्यं मन्द्रं स्वरं जनयति । कण्ठे चरन्

मध्यान्दिनयुगं त्रैष्टुभानुगम् मध्यमं स्वरं जनयति। शिरसि चरन् तारस्वरम् जनयति। स स्वरः उदीर्णः मारुतः अभिहतः वक्त्रम् आपद्य वर्णान् जनयति। तेषां स्वरतः, कालतः, स्थानात्, प्रयत्नानुप्रदानतः, पञ्चधा विभागः स्मृतः इति वर्णविदः प्राहुः तद् निपुर्णं निबोधत इत्यर्थोऽवगम्यते (पाणिनीयशिक्षा, श्लो.६–१०) ।एतेन शब्दनिष्पादनार्थं उद्गमयति ततः स पवन हृदयादिदेशान् अतिक्रमान् मुखमापद्य वक्तृप्रयत्नानुसारेण तत्तत्स्थानेषु अभिघातेन वर्णान्जनयति। स वक्तुः प्रयत्नप्रेरितप्राणः तत्तत्स्थानेषु आघातेन विवक्षानुसारेण वर्णान्जनयति । एतेन वर्णोत्पत्तौ प्राणशक्तेः ज्ञानशक्तेश्च योगदानं वायोर्वर्णनिष्पादकत्वञ्च इति स्पष्टमेवावलोकितं भवति । अनया रीत्या वैखरीरूपेण वागुत्पत्तिर्भवति । स च वाग्विषये ऋग्संहितायामुक्तम्–

**चत्वारि वाक् परिमिता पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः।**
**गुहा त्रीणि निहिता नेङ्गयन्ति, तुरीयं वाचो मनुष्या वदन्ति ॥ (**ऋक्संहिता, २।३।२२॥)

अत्र चत्वारि वाक् इत्यस्य चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्चेति महाभाष्यम् । भर्तृहरिस्तु योगिभिरप्यगम्या परावागिति मत्वा त्रिधा वागिति व्याचष्टेः

**वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।**
**अनेकतीर्थभेदायास्त्रया वाचः परं पदम्॥** (भर्तृहरिः, वाक्यपदीयम् १।१४४॥)

शब्दोत्पत्तिविषये पाणिनीयशिक्षायां वृद्धपाठेद्रपि एतदुल्लिखितमस्ति–

**आकाशवायुप्रभवः शरीरात् समुच्चरन् वक्त्रमुपैतिनादः।**
**स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः॥** (शिक्षासूत्राणि, पृ.९।)

अकचटतपयसहेत्यादिनां वर्गभूतानां वर्णानां प्रादुर्भावकः विद्यातीर्थो भगवान् शङ्करोऽस्तीति त्रिपुरातापिन्युपनिषद्युक्तमस्ति– **अकचटतपयशान्सृजते । तस्मादीश्वरः कामोऽभिधीयते ॥** (ईषाद्यष्टोत्तरशतोपनिषदः, त्रिपुरातापिन्युपनिषद्, पृ.४६२।) तथैव श्रीमद्भागवतमहापुराणेऽपि— **भगवानजः अक्षरसमाम्नायमसृजद**दित्युक्तम् । (द्वादशस्कन्धस्य षष्ठोऽध्यायः, श्लो. ४२—४३, पृ. ६३५)। यथा सर्वा नद्यः समुद्रं प्राप्तुं धावन्ति, समुद्रं प्राप्य शान्ताः भवन्ति च तथैव सर्वे व्यवहाराः वाणीतः सफला भवन्ति। यथा समुद्रस्य क्षयो न जायते तथैव वाचोऽपि क्षयः कदापि न भवतीत्यपि निगदितं लभ्यते।

एवं प्रकारेण वर्णोत्पत्तिप्रक्रियायां विभिन्ना दृष्टय उपलभ्यन्ते। ऋग्वेदप्रातिशाख्ये वक्तुरीहायां प्राणवायुः कण्ठबिले विवृते श्वासतामापद्यते चेत् कण्ठबिले संवृते नादत्वमापद्यते, स एव कण्ठ्य वायुः वक्तुरीहागुणसंयोगेन वर्णत्वमापद्यमान एकोऽपि स वायुर्गुणविशेषयोगात् बहुरूपाणि प्राप्नोति । अर्थात् अनुप्रदानसंसर्गस्थान–करण–परिमाणादिभिः सह संयोगाद् वर्णानां रूपभेदो भवतीत्युक्तमस्ति। यथा– **वाग्वै समुद्रो न वै वाग् क्षीयते न समुद्रः** (ऐतरेयब्राह्मणः, ५।१६॥), । **वायुः प्राण कोष्ठ्यमनुप्रदानं कण्ठस्य खे विवृते संवृते वा। आपद्यते श्वासतां नादतां वा वक्त्रीहायाम्** (ऋक्प्रातिशाख्यम्, १३।१॥) । **प्रयोक्तुरीहागुणसन्निपाते वर्णीभवन् गुणविशेषयोगात् । एकः श्रुतीः कर्मणाप्नोति बह्वीः** ( ऋक्प्रातिशाख्यम्, १३।१३।) इति च।

***प्रचलितवर्णक्रमः***

भाषायां मातृकावर्णक्रमः, मालिनीवर्णक्रमः, प्रत्याहारवर्णक्रमः, तान्त्रिकवर्णक्रमादयः प्रचलिताः दृश्यन्ते । **आदिक्षान्ता मातृका वै नादिफान्ता तु मालिनी ।** इति कथनाद् अकाराद् क्षकारान्ताः वर्णाः मातृकावर्णाः कथ्यन्ते । ते च यथा सन्ति– अ आ इ ई उ ऊ ऋ ॠ लृ ए ऐ ओ औ अं अः । क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह क्ष इति । एवमेव नादिफान्तावर्णाः मालिनीवर्णाः कथ्यन्ते । ते च यथा सन्ति– न ऋ लृ लृ थ च ध ई ण उ ऊ ब क ख ग घ ङ इ अ व भ य ड ढ ठ झ ञ ज र ठ प छ ल आ स अ ह ष क्ष म श अँ त ए ऐ ओ औ द फ इति ।

***वर्णसङ्ख्यानिर्धारणम्***

वर्णसङ्ख्यानिर्धारणक्रमे पाणिनीयशिक्षायाम् एकविंशतिस्वराः, पञ्चविंशति स्पर्शसंज्ञकवर्णाः, एकोऽनुस्वारः, विसर्गश्चैकः, ≍क, ≍पौ इति द्वौ, दुस्स्पृष्टलकारः, प्लुतलृकारश्चापि संयुज्य चतुष्षष्टिवर्णाः भवन्ति । तेषु प्लुतलृकारस्य स्वीकाराभावे वैकल्पिकेन त्रिषष्टिवर्णाः माहेश्वरमते प्रसिद्धाः सन्ति । अ इ उ ऋ एते चत्वारः स्वराः ह्रस्वदीर्घप्लुतभेदेन द्वादशरूपतां भजन्ते, लृकारस्तु ह्रस्व एवोपदिश्यते, अत एते त्रयोदश भवन्ति । ए ऐ ओ औ इत्येतानि च सन्ध्यक्षराणि सन्ति । सन्ध्यक्षरेषु ह्रस्वो न भवति, तस्माद् दीर्घप्लुतभेदाभ्यामष्टावेतानि । ततश्च त्रयोदशभिः सह संख्याने एकविंशतिः स्वराः सङ्कलिताः । अतः परं कादयो मावसानाः स्पर्शाः पञ्चविंशतिः सन्ति । एते हि जिह्वामूलतालुमूर्धदन्तोष्ठादिभिः परस्परं स्पर्शैरभिनिष्पद्याविर्भवन्तीति हेतोः स्पर्शा उच्यन्ते । य र ल व श ष स ह इत्यष्टौ ध्वनयो यादिपदेनावगम्यन्ते । तदनु यमाश्चत्वारः कथिताः । ते च प्रातिशाख्य एव प्रसिद्धाः । तत्र वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्ण इत्युच्यते । तदुदाहराणानि च पलिक्क्नीः, चख्ख्नतुः, अग्ग्निः, घ्घ्न्तीत्येतानि । ततोऽनुस्वारः, विसर्गः, ≍क ≍प, दुःस्पृष्टो लकारः, स च अग्निमीडे इत्यादौ प्रसिद्धः । ल् ह ध्वनिरपि वेदे श्रूयते । पृतनासु साल्हा (साढ्वा) इत्यादौ । किन्तु पाणिनिना स न सङ्गृहीतः, दुःस्पृष्टपदेन तस्यापि सङ्ग्रहसम्भवात् । केचित् लृकारोऽपि प्लुत इति वदन्ति । अत एव त्रिषष्टिश्चतुःषष्टिर्वेत्युक्तम् । (पाणिनिशिक्षा, श्लो. ३—५, पृ.२९९।) ते च वर्णाः यथा सन्ति–

**स्वरवर्णाः**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| अ | आ | इ | ई | उ | ऊ | ऋ | ॠ |
| लृ | लृ | ए | ऐ | ओ | औ | अं | अः |

**व्यञ्जनवर्णाः**

| | | | | |
|---|---|---|---|---|
| क् | ख् | ग् | घ् | ङ् |
| च् | छ् | ज् | झ् | ञ् |
| ट् | ठ् | ड् | ढ् | ण् |
| त् | थ् | द् | ध् | न् |
| प् | फ् | ब् | भ् | म् |

| | | | | |
|---|---|---|---|---|
| य् | र् | ल् | व् | |
| श् | ष् | स् | ह् | |
| क्ष् | त्र् | ज्ञ् | | |

| | |
|---|---|
| अनुस्वारः | ं |
| विसर्गः | ः |
| जिह्वामूलीयः | ≍क |
| उपध्मानीयः | ≍प |
| दुस्स्पृष्टः | ल् |

*वर्णसमाम्नायस्थ वर्णक्रमः*

वर्णानां नाम वर्णसमाम्नायः, अक्षरसमाम्नाय इति वा शास्त्रेष्ववलोक्यते। यजुः प्रातिशाख्ये अष्टमाध्याये **अथातो वर्णसमाम्नायं व्याख्यास्यामः** (यजुः प्रातिशाख्यम् अ.८, सू. १) इति सूत्रेण वर्णसमाम्नायस्योपक्षेपः प्रारब्धः। तत्र स्वराः प्रथमम् (यजुः प्रातिशाख्यम् अ.८, सू. २) इत्यनेन सूत्रेण ह्रस्वदीर्घप्लुतभेदैः पञ्चस्थानोद्भवा पञ्चदशस्वराः निर्दिष्टाः। अथ व्यञ्जनानि इत्यतः यजुर्वेदप्रातिशाख्यस्याष्टमोऽध्यायस्य चतुर्विंशति मितैः सूत्रैर्व्यञ्जनानि, अयोगवाहाः, यमाश्च व्याख्याताः। आचार्यपाणिनिना माहेश्वरवरप्रसादाल्लब्धानि चतुर्दशसूत्राणि समाहृत्य व्याकरणप्रपञ्चं व्यधायि। अत्र– अइउण्। ऋलृक्। एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। शषसर्। हल्। (पाणिनिः, अष्टाध्यायी, पृ. १)। इत्येतानि चतुर्दशसूत्रण्यधीकृत्य चतुश्चत्वारिंशत्प्रत्याहारा निर्मियन्ते। पाणिनिनैतेषु अन्त्यवर्णानित्–संज्ञकान् विधाय **आदिरन्त्येन सहेता** १।१।७१॥ इति सूत्रेण प्रत्याहाराणां कल्पना विहिता।

ते च यथा सन्ति– अण्, अक्, इक्, उक्, एङ्, अच्, इच्, एच्, ऐच्, अट्, अण्, इण्, यण्, अम्, यम्, ञम्, ङम्, यञ्, झष्, भष्, अश्, हश्, वश्, जश्, झश्, बश्, छव्, यय्, मय्, झय्, खय्, चय्, यर्, झर्, खर्, चर्, शर्, अल्, हल्, वल्, रल्, झल्, शल्, रप्रत्याहारश्चेति।

*अयोगवाहानां परिचयः*

संस्कृतभाषायां वर्णाः द्विधा सन्ति– अकारादयः स्वरवर्णाः, हकारादयः व्यञ्जनवर्णाश्च। अक्षरसमाम्नाये एषां स्वरव्यञ्जनवर्णानामुपदशो वर्तते। केचनवर्णाः भाषायां प्रयोगावस्थायां दृश्यन्ते किन्तु अक्षरसमाम्नाये तेषां सम्बन्धो न दृश्यन्ते। एतादृशा वर्णा अयोगवाहाः कथ्यन्ते। न विद्यते योग अक्षरसमाम्नाये सम्बन्धो येषां ते अयोगाः, वहन्ति–कार्यं कुर्वन्ति ते वाहाः। अयोगाश्च वाहाश्च इति अयोगवाहाः। अयोगवाहो नाम अविद्यमानो योग अर्थात् प्रत्याहारेषु सम्बन्धो नास्ति येषां ते अयोगाः। अनुपदिष्टत्वात् उपदिष्टै अगृहीतत्वाच्च प्रत्याहारसम्बन्धशून्या इत्यर्थः। वाहयन्ति निर्वाहयन्ति प्रयोगमिति वाहाः।

अयोगाश्च ते वाहा इति अयोगवाहाः । अनुपिदष्टत्वे उपदिष्टैरगृहीतत्वे च सति श्रूयमाणा इत्यर्थः । अयोगवाहाशब्दे बहुव्रीहिगर्भः कर्मधारयो भवति। न योगः अक्षरसमाम्नाये उपदेशाभावेन सम्बन्धो येषां ते अयोगाः, वहन्ति प्रयोगं निर्वाहयन्ति इति वाहाश्चेति अयोगवाहा इति विग्रहो भवति। ते च विसर्जनीयः जिह्वमूलीयोपमाध्मानीयाः अनुस्वारनासिक्य यमाः। एते वर्णाः अयोगवाहाः कथ्यन्ते।

***अयोगवाहानां प्रकाराः***

अयोगवाहाः तेषु वर्णेषु गण्यन्ते, यत्र वर्णसमाम्नाये अक्षरसङ्ग्रहे वा सम्बन्धो न दृश्यते, किन्तु तैः विशेषकार्याणि क्रियन्ते । अयोगाश्च वाहाश्च इत्यनेन **अयोगवाहाः** इत्याख्यायन्ते । स्वतन्त्रतयोच्चारणमनयोः न सम्भवति । अनुस्वार–विसर्जनीय–जिह्वामूलीयोपध्मानीयाः यमाश्चेति अयोगवाहा इति उच्यन्ते।

**(क) विसर्जनीय**

हः इत्यस्य विसर्गरूपे प्रयोगः। विसृज्यते पुनर्वर्णैर्न संयुज्यते इति विसर्गः। विनाऽवरोधं उच्चारणीयः श्वासमयो वर्णविशेषो हि विसर्गः। विसृज्यते विनाऽवरोधं श्वासरूपेण वहिर्निष्काल्यते इति विसर्गः (दुर्गसिंहः, कातन्त्रव्याकरणवृत्तिः, १।१।१६॥)। (अः) इत्यत्राकारानन्तरस्थित–द्विविन्दुसदृशोवर्णो विसर्गः। अकुहविसर्जनीयानां कण्ठ्यः इति कथनाद् विसर्गस्य कण्ठ्यस्थानीयवर्णः कथ्यते।

**(ख) जिह्वामूलीय**

जिह्वामूले भवो वर्णः जिह्वामूलीयः। ≍क, ≍ख इत्यादिस्थले उत्पन्नध्वनिः। परो यो वर्णः ककारः पकारो वा तमाश्रितौ तदुपजीविनौ जिह्वामूलीयोपध्मानीयौ। अर्थात् जिह्वामूलीयः कखाभ्यां प्रागर्धचन्द्राकारद्वयविद्यमानविसर्गः। यथा प्रात≍कालः, क≍खनाति। **जिह्वामूलाङ्गुलेश्छ** (४।३।६८॥) इति सूत्रे वर्णितः। ≍क इत्यत्र कवर्णात् पूर्वस्मिन् अर्धविसर्गसदृशो वर्णः जिह्वामूलीयः। कखयोः परतो विसर्जनीयस्य स्थाने वज्राकृतिवद् यो वर्ण आदिश्यते स जिह्वामूलीय इति कथ्यते। जिह्वाया मूलं तत्र वायोराघातेनोच्चरितत्वाज्जिह्वामूलीयः स वर्णो विज्ञेयः।

**(ग) उपध्मानीय**

≍प, ≍फ इत्यादिस्थले उत्पन्नध्वनिर्विशेषः। पफाभ्यां प्रागर्धचन्द्राकारद्वयवद्विद्यमानः विसर्गः। यथा, क≍पठति, तरु≍फलति। **उश्च पश्च ध्मायेते अनेन तत्र भव इति योगेन उपध्मानीयस्यौष्ठ्यत्वम्।** (नागेशभट्टः, लघुशब्देन्दुशेखरः) ≍प इत्यत्र पवर्णात् पूर्वार्धविसर्गसदृशो वर्णः उपध्मानीयः। पफयोः परतो विसर्गस्य स्थाने यो गजकुम्भाकृतिः वर्ण आदिश्यते स उपध्मानीयसञ्ज्ञको भवति। पफयोः उप समीपे ध्मायते शब्द्यते इत्युपध्मानीयः। वर्णान्तरमपि यद्यपि पफयोः समीपे ध्मायते तथापि रूढिवशाद् गजकुम्भाकृतिरेव वर्ण उपध्मानीय उच्यते।

**(घ) अनुस्वार**

स्वरमनुभवतीत्यनुस्वारः। नासिक्यध्वनिरूपेणोच्चारित ङ्, ञ्, ण्, न्, म् एतेषां वर्णानामनुस्वाररूपेण प्रयुज्यन्ते। स्वरमनुसृत्योच्चर्येते इत्यत अनुस्वार इति नाम । (अं) इत्यत्राकारस्योपरिस्थित–विन्दुसदृशोवर्णोऽनुस्वारः । यथा, अं इत्यनुस्वारः।

**(ङ) यमा**

नासाग्रनिर्गतध्वनिः, यः उच्चारणं सरलयति । अँ इत्यनुनासिक्यम् । कं खं गं घं इति यमाः । एषां नासिक्याः वर्णा अपि कथ्यन्ते । चत्वारश्च यमाः स्मृताः (पाणिनीयशिक्षा, श्लो. ४) इति कथनेन यमाः चत्वारः कथिता । यम्यन्ते मुखभवश्रुतियमनेन निर्वत्र्यन्ते इति यमा वर्णविशेषाः । यच्छन्तीति यमाः । ते च प्रातिशाख्ये एव प्रसिद्धाः । तत्र वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्ण इत्युच्यते । तदुदाहरणानि च पलिक्क्नीः, चख्ख्नतुः, अग्ग्निः, घ्घ्नन्तीत्येतानि । (भट्टोजिदीक्षितः, सिद्धान्तकौमुदी, पृ. १६ ।) ।

अयोगवाहानामविशेषेणोपदेशस्यापि सन्ति । प्रयोजनानि तानि च यथा– उ३ब्जक इत्यत्र संयोगसंज्ञा ततः संयोगे गुरु इति गुरुसंज्ञा ततः गुरारनृतोऽनन्त्यस्यप्येकैकस्य प्राचाम् इति प्लुतसंज्ञा च यथा स्यात् । उपदासंज्ञा च दुष्कृतं निष्कृतं इत्यादौ इदुदुपधस्य चाप्रत्ययस्य इति षत्वस्य सिद्धिर्भवति । अलोऽन्त्यस्य विधिश्च वृक्षस्तरति इत्यत्र अलोऽन्त्यस्य इति सत्वं सिद्धं भवति । द्विवचनं प्रयोजनम्– उरः कः इत्यादौ अनचि च इति द्विवचनं सिद्ध्यति । स्थानिवद्भावप्रतिषेधश्च प्रयोजनम्– व्युढोरस्केन इत्यादौ अनल्विधौ इति प्रतिषेध सिद्धो भवति ।

***पदविज्ञानम्***

पदस्वरूपस्य निर्वचनकं विज्ञानं पदविज्ञानं भवितुमर्हति । नियमेनैव शब्दानां पदत्वसंज्ञा यत्र विधीयते तत एव सर्वत्र पदत्वस्थापनादस्य विज्ञानत्वं बोध्यम् । पदविज्ञानमिति शीर्षके तत्र पाठ्यक्रमे पदस्वरूपम्, सुप्तिङन्तानां पदत्वम्, नामाख्यातोपसर्गनिपातानां परिचयः, पदविषयकं निरुक्तकारमतम्, पतञ्जलिमतेन पदविभागश्चेति विषयाः सन्ति निर्धारिता । तेषामत्र सङ्क्षिप्तरूपेण विवेचनं क्रियते ।

***पदस्वरूपम्***

प्राप्यते ज्ञायते येन इति पदम् वा पद्यते गम्यत अर्थोऽनेनेति पदम् । पदगतौ इत्यस्माद् धातोर्निष्पन्नोऽयं पदशब्दः । अष्टाध्याय्यां महर्षिणा पाणिनिना पदम्–नाम पदसंज्ञकमिति कथितम् । तच्च पदसंज्ञा विधायकं सूत्रं **सुप्तिङन्तं पदम्** (१।४।१४॥), **स्वादिष्वसर्वनामस्थाने** (१।४।१७॥), **सिति च** (१।४।१६॥) इति लिखितम् । लोके प्रयोगार्हत्वसम्पादनं जश्त्वकुत्वादिसम्पादनं भसंज्ञाबाधनमिति क्रमशः सूत्रत्रयस्य भिन्नं भिन्नं प्रयोजनं सिद्ध्यति । शब्दव्याख्यानरूपेण व्याकरणेन हि पदादिविभागश ऋग्वेदादयो ज्ञायन्तेति छान्दग्योपनिषदि, **वाग्वाच नाम्नो भूयसी वाग्वा ऋग्वेदं विज्ञापयति....भगवान्ब्रवीत्विति ॥** (छान्दोग्योपनिषद् ७।२।) व्याकरणं वेदानां वेदतया प्रसिद्धं गतम् । अनेन महती प्रतिष्ठा खलु व्याकरणस्य विज्ञायते । निरुक्तकाराद् यास्कात् प्रागपि व्याकरणपरम्पराऽऽसीदिति सिद्ध्यति । एतस्यां चिरन्तन्यां खलु व्याकरणशास्त्रपरम्परायां जागर्ति सम्प्रति पाणिनीयं व्याकरणं लौकिकवैदिकशब्दप्रतिपादकम् । पाणिनेः प्राक्तनस्य व्याकरणस्य कीदृशं रूपमभूदिति न शक्यते ज्ञातुमस्माभिः साम्प्रतम् ।

श्रोत्रग्राह्यो गुणविशेषः शब्दः, स च वर्णविभागो व्यक्तस्तदन्योऽव्यक्तः । व्यक्तोऽप्यर्थावबोधकः सार्थकः, अर्थानवबोधको निरर्थकः। वाद्यादिसमुद्भवो निरर्थकोऽव्यक्तशब्दो ध्वनिमात्रमुच्यते। सार्थकोऽपि संस्कृतोऽपभ्रंशश्चेति द्विधा। शास्त्रेषु प्रायः संस्कृताः परिशुद्धतयापूर्वविशेषोत्पादकतया धर्म्याः, शिष्टपरिगृहीतालोकेऽपि व्यवह्रियमाणा लौकिकाः शब्दाः। वैदिकलौकिकयोरेकजातीयत्वेऽपि क्वचन संस्कारविशेषात् स्वरूपविशेषः। वैदिकशब्दगता विशेषाः शिक्षाप्रातिशाख्यादिषु केचन पाणिनीयेपि दर्शिताः। लौकिके व्याकरणे साधारणलोकव्यवहारोपयोगिशब्दानां साधुता प्रदश्र्यते। वर्णैः पदं पदैर्वाक्यं वाक्यैः सन्दर्भस्तथा प्रबन्धः सिद्ध्यति। एभिर्वर्णपदवाक्यसन्दर्भैर्व्यवहारयात्रा प्रवर्तते। तत्र वर्णमात्रं प्रायो निरर्थकमपि तन्निष्पन्नानि पदानि तु सार्थकान्येव भवन्तीति।

संस्कृते, अपदं न प्रयुञ्जीतेति नियमात् पदत्वमापन्नः सार्थक एव शब्दः प्रयोगयोग्यो भवति। पदेषु प्रकृत्यंशः प्रत्ययांशश्चेत्यंशद्वयं भवति। तद्द्वयमितित्वैकं पदं प्रयोगयोग्यं जायते। उक्तञ्च— **न केवला प्रकृतिः प्रयोक्तव्या**, **नाऽपि केवलः प्रत्ययः** (नागेशभट्टः, लघुशब्देन्दुशेखरः, पृ.१७१।) इति। एवमेव भर्तृहरिणा वाक्यपदीयग्रन्थस्य ब्रह्मकाण्डेऽप्यष्टौ पदार्था निरूपिताः –

**अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः। अन्वाख्येयाश्च ये शब्दाः ये चापि प्रतिपादकाः।**
**कार्यकारणभावेन योग्यभावेन च स्थिताः। धर्मे ये प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु।**
(वाक्यपदीयम् १।२४–२५।।) इति ।

तथैव सायणाचार्येण माधवीयधातुवृत्तौ पदस्य महत्त्वविष य चोक्तम्– **व्याकरणात् पदसिद्धिः**, **पदसिद्धेरर्थनिर्णयो भवति अर्थात् तत्त्वज्ञानं तत्त्वज्ञानात् परं श्रेयः।** (सायणाचार्यः, माधवीयधातुवृत्तिः, पृ. १ ।) इति। संस्कृतव्याकरणे सुपस्तिङश्च विभक्तयः प्रत्ययाश्च प्रोच्यन्ते। एभिर्विना शब्दानां स्वरूपाणि न सिद्ध्यन्ति। यद्धातुभ्यो विहितैः कृत्प्रत्ययैर्नामवाचकशब्देभ्यो विहितैस्तद्धितप्रत्ययैः समासैश्च नामवाचका विशेषणवाचका अव्ययवाचकाश्चेत्यादिशब्दा निष्पद्यन्ते। नामादिवाचकेभ्यः सुपा सुबन्ता धातुभ्यस्तिङा तिङन्ताश्च शब्दा निष्पद्यन्ते। शब्दतः पदनिर्माणे तत्र विभक्तिबोधकाः प्रत्ययाः संयोज्या भवन्ति। एतादृशानि पदानि वाक्येषु प्रयोगार्थं योग्यानि भवन्ति। वाक्येषु समुचितक्रमेण प्रयोगयोग्याः विभक्तिसहिताः शब्दाः पदानि भवन्ति। पदवर्गीकरणसन्दर्भे प्रथमतः ऋग्वेदीयमन्त्रस्य स्मरणं भवति– **चत्वारि वाक्परिमिता पदानि...** (ऋग्वेदसंहिता, १।१६४।४५।।), **चत्वारि शृङ्गा त्रयो अस्य पादा...** (ऋग्वेदसंहिता, ४।५८।३।।) इति च। वैदिकवाङ्मयेषु पदविषयकचर्चा सुलभरूपेण प्राप्यते। निरुक्तकारवचनानुसारेण— **ओङ्कारो महाव्याहृतयश्चेत्यार्षम्, नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणाः, मन्त्रः कल्पो ब्राह्मणं चतुर्थी व्यावहारिकीति याज्ञिकाः**, **ऋचो यजूंषि सामानि चतुर्थी व्यावहारिकीति** (यास्कः, निरुक्तम्, १३।१।७।।)। निरुक्तकारप्रतिपादितवैयाकरणव्याख्यानं महाभाष्ये दृश्यते प्रक्रियात्मकम्– **नामाख्यातोपसर्ग–निपातेष्वेव सर्वा वाक् परिमितेत्यखण्डायाः कृत्स्नाया वाचस्चतुर्धा व्याकृतत्वात्। वाग् वै पराच्यव्याकृताऽवदत् तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्, तस्मादियं व्याकृता वागुच्यते** (तैत्तिरीयसंहिता ६।४।७।३।) इति श्रुतेः।

पदनिर्वचनक्रमे प्राचीनाचार्यैः सार्थकं पदमित्येकपदं स्वीकृतम् । आचार्यपाणिनिना अष्टाध्याय्यां सुप्तिङन्तं पदम् (१।४।१४।।) इति सूत्रे सुबन्तं तिङन्तमिति द्विविधं पदस्वरूपं कथितमस्ति । तथैवाव्ययानामपि निर्विकारतया पृथक्कृत्य नामाख्याताव्ययानीति त्रिधा पदानि कथितानि । अव्ययेषूपसर्गनिपातौ पृथक्कृत्य उपसर्गेतराणि निपातत्वेन सङ्गृह्य नामाख्यातोपसर्गनिपाता इति चतुर्धा पदप्रकाराः कथिताः । ऋग्वेदीयो मन्त्रो महाभाष्यकारेण व्याकरणदृशा व्याख्यातः, **चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च** इति । (व्याकरणमहाभाष्यम्, पृ. १३) । अर्वाचीनैर्नाम त्रिधा विभज्य उपसर्गनिपाताव्ययत्वेन सङ्गृह्य नामसर्वनामविशेषणा–ख्याताव्ययानीति पञ्चधा निरूप्यन्ते पदानि । नामाख्यातोपसर्गनिपातभेदैश्चतुर्धा विभाग आर्षः प्रत्नश्च । प्रातिशाख्ये चोक्तम्– चत्वार्याहुः पदजातानि नामाख्यातोपसर्गनिपाताश्चेति । शब्दान्तरयोगेनैव प्रयोज्याः प्रपरेत्यादय उपसर्गाः, पृथक्प्रयोज्याश्चादयो निपाता इत्यनयोर्विशेषः । यास्काचार्येण सम्पूर्णपदविभागश्चतुर्धा नामरूपेण, आख्यातरूपेण, उपसर्गरूपेण, निपातरूपेण च प्रदर्शितः ।

आचार्यपाणिनिस्तु नाङ्गीकरोत्यानुपूर्वीरूपेण यास्कस्य पदविभागम् । तस्याष्टाध्याय्यां तु सम्पूर्णपदराशिर्द्विधा विभक्तो दृश्यते । सुबन्तरूपेण तिङन्तरूपेण च । अव्ययशब्दा अपि सुबन्तत्वेनाभिमतास्तेषां किन्त्वव्ययशब्दानामवान्तरपदविभागस्तु चतुर्धैव दृश्यतेऽष्टाध्याय्याम्, निपातरूपेण, उपसर्गरूपेण, गतिरूपेण कर्मप्रवचनीयरूपेण चेति । तथैव साहित्यशास्त्रे च रुद्रटमहाभागेन काव्यालङ्कारे नामाख्यातनिपाता उपसर्गाश्चेति चत्वारि पदानि स्वीकृतानि सन्ति–

**नामाख्यातनिपाता उपसर्गाश्चेति संमतं येषाम् ।**
**तत्रोक्ता न भवेयुस्तैः कर्मप्रवचनीयास्तु २।२।।** (काव्यालङ्कारः, पृ. १९) इति ।

संस्कृतभाषाया ऐतिहासिकेनानुसन्धानेन वक्तुं प्रभवामो यत् पदचातुर्विध्यरूपविभाग एव संस्कृतभाषाया नैसर्गिको विभागः प्रतिभाति । अव्ययरूपो विभागस्तु स्वयमेव प्रमाणयति यत् सोऽर्वाक्कालिक इति । अतः चत्वारि वाक्परिमिता पदानि इति श्रुतिरेव प्रमाणत्वेनाङ्गीक्रियतेऽत्र । संस्कृतवाङ्मये द्विविधः, चतुर्विधः पञ्चविधश्च पदविभागो प्रचलितो दृश्यते । तत्र भर्तृहरिर्वाक्यपदीये चैतत्स्पष्टं प्रतिपादयति । स तत्राह–

**द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधापि वा ।**
**अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत् ।।** (वाक्यपदीयम्,१।१४२।।) इति ।

सोमनाथमहाभागेन पदनिरूपणक्रमेऽनुवादचन्द्रिकायां निगदितं यत् —

**पदमेकैकखण्डार्थं सुप्तिङन्ताव्ययात्मकम् । सुबन्तं त्रिविधं नाम सर्वनाम विशेषणम् ।।**

**धातोस्तिङन्तं, नामादेः सुबन्तं जायते पदम् । विकारीदं द्वयं रूपैर्निर्विकारकमव्ययम् ।।**

(अनुवादचन्द्रिका, पृ. १३, १४।) इति ।

संस्कृतव्याकरणे पाणिनिपूर्वकालत आरभ्यः पाणिन्युत्तरकालपर्यन्तं पदस्वरूपविषये विविधैर्वैयाकरणैः स्वस्वकृतिषु व्याख्यानं विहितमस्ति । तेषु पदस्वरूपविषये मतवैविध्यं दृश्यते । पाणिनिः सुप्तिङन्तरूपं पदद्वयं मनुते चेदन्ये विद्वांस अव्ययानां पृथक् पदं प्रतिपादयन्ति । पाणिनिना सुबन्तेष्वव्ययपदानन्यन्तर्भावितानि ।

**निष्कर्षः**

पौरस्त्यवाङ्मये शिक्षा–निरुक्तम्–व्याकरणमितित्रयं शब्दानुशासनसम्बद्धग्रन्थेषु यत्र तत्र सर्वत्र भाषाविज्ञानस्य विषयाः सन्ति । तत्र तावत् शिक्षायां वर्णस्वरमात्रादीनामुत्पत्तिसंख्यादिविवेचनं विज्ञानपूर्णं प्रतिभाति । यद् भाषाया ध्वनिः, पदम्, वाक्यम्, अर्थम् इति चत्वारि स्वाङ्गानि सन्ति तत्र ध्वनिविमर्शः, ध्वनिविज्ञानं वा, शिक्षाग्रन्थेषु तदनु प्रातिशाख्येषु समुपलभ्यन्ते । वर्णोत्पत्तिमधिकृत्य बहवो विचाराः संस्कृते समुपलभ्यन्ते । तत्र कथं ध्वनिः वर्णरूपं भजन्ते, कानि तेषामभिव्यञ्जकस्थानानि, कियती च तत्संख्या, वर्गीकरणं च वर्णानां कथमित्यनेकविधं तद् विवेचनं शिक्षादिग्रन्थेषु विकीर्णरूपेण दरीदृश्यते । निरुक्ते भाषापरिवर्तननियमा न स्पष्टमुक्ताः, अपि तु निरुक्तकृन्निर्वचनशैलीं सुसमीक्ष्य ते नियमा ऊह्या भवन्ति । शब्दा नित्याः, अनित्या वा, शब्दो द्रव्यं गुणो वा, शब्दे गतिरस्ति न वा, अपि च शब्दाकाश उताहो पञ्चभूतानि इत्यादिविषयाणां विचारः प्राचीनदार्शनिकैः कृतः । अत्राऽलेखे प्राचीनानां प्रातिशाख्य–निरुक्त–व्याकरणादिग्रन्थान्तर्गतानां तत्तद् ग्रन्थकर्तृणां महर्षीणां मतम्, भाषाविज्ञानविदां च सरणिमनुसृत्य पाणिनीयव्याकरणसम्बद्धाया भाषावैज्ञानिकपद्धतेरनुसारेण ध्वनिवर्णपदानां सगभीरमध्ययनं कृतम् ।

**सन्दर्भसूची**

*अग्निपुराणम्* (ई. १९९०). गीताप्रेस ।

*ईशादिविंशोत्तरशतोपनिषदः*(आचार्यः, नारायणरामः, सम्पा.) (१९४८). निर्णयसागर–मुद्रणालयः ।

कैयटः (ई. १९९९). *भाष्यप्रदीपः* (गुरुप्रसादशास्त्री, नन्दकिशोरशास्त्री, सम्पा.). प्रतिभा–प्रकाशन ।

*कृष्णयजुर्वेदीय–तैत्तिरीयब्राह्मणम्* (नारायण शास्त्री गोडबोले, सम्पा.) (१८९८).आनन्दाश्रम ।

गैरोला, वाचस्पतिः (ई. १९९१). *संस्कृत साहित्य का इतिहास* (चतुर्थ संस्करणम्) . चौखम्बा–विद्या–भवनम् ।

गौडः, अशोकचन्द्रः (ई. २०५५). *संस्कृतव्याकरणशास्त्रस्येतिहासविमर्शः*. भारतीय–विद्या–संस्थानम् ।

तैत्तिरीयोपनिषद् (कन्हैया लाल जोशी, व्याख्या.) (ई.२००१). चौखम्बा–विद्या–भवनम् ।

दण्डिः (ई. २००९). *काव्यादर्शः* (शिवनारायणशास्त्री, सम्पा.). परिमल पब्लिकेशन ।

दाहालः, लोकमणिः (२०४६). *व्याकरणशास्त्रस्येतिहासः* (छात्र–संस्करणम्). भारतीय–विद्या–प्रकाशन ।

दीक्षितः, भट्टोजिः (ई.१९९९). *सिद्धान्तकौमुदी*, *बालमनोरमाटीका* (गोपालदत्तपाण्डेयः, सम्पा.). चौखम्बा–सुरभारती–प्रकाशनम् ।

दीक्षितः, भट्टोजिः (ई. २००९). *सिद्धान्तकौमुदी, तत्त्वबोधिनिसमाख्यव्याख्यासंवलिता* (वासुदेवशर्मा, सम्पा.). लालबहादुरशास्त्री–राष्ट्रिय–संस्कृत–विद्यापीठम्।

पाणिनिः (ई. २००६). *अष्टाध्यायी, सरलव्याख्याटीकालङ्कृत्य* (गुरुप्रसादशास्त्री, सम्पा.). भार्गव– पुस्तकालयम्।

पाणिनिः (ई. २०४६). पाणिनीयशिक्षा, शिवराजकौण्डिन्न्यायनः व्याख्या.), चौखम्बा विद्याभवन, वाराणसी।

पाण्डेयः, रामाज्ञा (२०३९). *व्याकरणदर्शनभूमिका* (गौरीनाथशास्त्रिः, सम्पा.). सम्पूर्णानन्द– संस्कृत–विश्वविद्यालयः।

पाण्डेयः, रामाज्ञा (२०४३). *व्याकरणदर्शनपीठिका* (गौरीनाथशास्त्रिः, सम्पा.). सम्पूर्णानन्द–संस्कृत–विश्वविद्यालयः।

*पाराशरोपपुराणम्* (कपिलदेवत्रिपाठी, सम्पा.) (२०४६). सम्पूर्णानन्द–संस्कृत–विश्वविद्यालयः।

पतञ्जलिः (ई. २००३). *व्याकरणमहाभाष्यम्, नवाह्निकः* (मधुसुदनमिश्रः, सम्पा.). चौखम्बा–विद्या– भवनम्।

पतञ्जलिः (ई. १९९९). *व्याकरणमहाभाष्यम्* (गुरुप्रसादशास्त्रिः, सम्पा.; नन्दकिशोरशास्त्रिः, सम्पा.). प्रतिभा–प्रकाशन।

भर्तृहरिः (ई. २०५६). *वाक्यपदीयम्* (रघुनाथशर्मा, सम्पा.). सम्पूर्णानन्द–संस्कृत–विश्वविद्यालयः।

भट्टः कौण्डः (२०६४). *वैयाकरणभूषणसारः* (अनन्तशास्त्रिफड्के, सम्पा.). चौखम्बा–संस्कृत– भवनम्।

भट्टः, नागेशः (१९८९). *वैयाकरणसिद्धान्तमञ्जूषा* कलाकुञ्जिकासहित (प्रथमो भागः). चौखम्बा– संस्कृत–सिरीज–अफिस।

भट्टः, नागेशः (ई. २००२). *व्याकरणमहाभाष्यम्,* नवाह्निकः (चारुदेवशास्त्री, अनुवादकः). मोतिलाल– बनारसीदास।

भट्टः, नागेशः (२०४६). *परमलघुमञ्जूषा* (टीप्पणीकारः नित्यानन्दः पर्वतीयः; व्याख्याकारः अलखदेवशर्मा). चौखम्बा–अमरभारती–प्रकाशनम्।

*माधवीया धातुवृत्तिः* (ई. १९८७). (द्वारिकादासशास्त्रिः, सम्पा.). तारा–बुक–एजेन्सी।

मिश्रः, रामनारायणः (ई. १९९७). *स्फोटसिद्धान्तः*. सम्पूर्णानन्द–संस्कृत–विश्वविद्यालयः।

मीमांसकः, युधिष्ठिरः (२०४१). *संस्कृत व्याकरणशास्त्र का इतिहास*. शान्तिस्वरूप–कपूर, रामलाल–कपूर ट्रष्ट प्रेस, हरयाणा।

वाल्मीकिः (२०६१). *श्रीमद्वाल्मीकीयरामायणम्* (२८औं संस्क.). गीताप्रेस।

विश्वनाथः (ई. १९९५). *साहित्यदर्पणः* (रतिरामदहाल, सम्पा.). चौखम्बा–सुरभारती–प्रकाशन, वाराणसी।

सायणाचार्यः (ई. १९८७). *माधवीया धातुवृत्तिः* (द्वारिकादासशास्त्रिः, सम्पा.). तारा–बुक–एजेन्सी, वाराणसी।

सिग्द्यालः, सोमनाथः (ई. २००६). *अनुवादचन्द्रिका* (तृतीयप्रकाशः). सोमनाथशर्मा, काठमाण्डौ।

सिंहः, अमरः (ई. १९९३). *अमरकोशः* (बालकृष्णाश्रमीनेपालीटीकासहित, कुलचन्द्रगौतमः, सम्पा.). लक्ष्मीनाथ गौतम, काठमाण्डौ, टङ्गाल, गैरीधारा।

सुवेदी, गुरुप्रसादः (२०८१). *व्याकरणदर्शनाध्ययनम्*. स्वाध्यायसदनम्, देवघट्टः।